"गोरोचनालिखितभूर्ज्जपत्रगर्भान् मन्त्रगण्डकान्"काद० स्फोटकरोगे "अनेकवेत्राघातनिर्मितबहुगात्रगण्डकम्" काद०। गण्डकी नदी सन्निकृष्टतयाऽस्त्यस्य अच्। गण्डकप्राचीस्थदेशभेदे तत्रवासिषु तन्नृपेषु बहुव० "ततः स गण्डकान् शूरो विदेहान् भरतर्षभः। विजित्याल्पेन कालेन"भा०स०२८अ० भीमप्राचीजयोक्तौ।

**गण्डकी** स्त्री गण्ड+जातौ ङीष्। १गण्डकी गण्डकजातिस्त्रियाम्। २नदीभेदे ३तदधिष्ठातृदेवीभेदे च सा च विष्णुसेवया शालग्रामशिलाखनित्वं लेभे तत्-कथा। वराहपु०

"गण्डक्यापि पुरा तप्तं वर्षाणामयुतं विभो!। शीर्णपर्णाशनं कृत्वा वायुभक्षाप्यनन्तरम्। दिव्यं वर्षशतं तेमे विष्णुं चिन्तयती सदा। ततः साक्षाज्जगन्नाथो हरिर्भक्तजनप्रियः। उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः। गण्डकि! त्वां प्रसन्नोऽस्मि तपसा विस्मितोऽनघे!। अनवच्छिन्नया भक्त्या वरं वरय सुव्रते!। किं देयं तद्वदस्वाशु प्रीतोऽस्मि वरवर्णिनि!। गण्डक्यपि पुरोदृष्ट्वा शङ्खचक्रगदाधरम्। दण्डवत् प्रणता भूत्वा ततः स्तोतुं प्रचक्रमे।" "ततो हिमांशो! सा देवी गण्डकी लोकतारिणी। प्राञ्जलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत्। यदि देव! प्रसन्नोऽसि देयो मे वाञ्छितो वरः। मम गर्भगतो भूत्वा विष्णो! मत् पुत्रतां व्रज। ततः प्रसन्नो भगवान् चिन्तयामास गोपते!। किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया। दास्यामि याचितं येन लोकानां भवमोचनम्। इत्येवं कृपया देवो निश्चित्य मनसा स्वयम्। गण्डकीमवदत् प्रीतः शृणु देवि! वचो मम। शालग्रामशिलारूपी तव गर्भगतः सदा। तिष्ठामि तव पुत्रत्वे भक्तानुग्रहकारणात्। मत्सान्निध्यात् नदीनां त्वमतिश्रेष्ठा भविष्यसि। दर्शनात् स्पर्शनात् स्नानात् पानाच्चैवावगाहनात्। हरिष्यसि महापापं वाङ्मनःकायसम्भवम्। यः स्नास्यति विधानेन देवर्षिपितृतर्पकः। तर्पयेत् स्वपितॄंश्चापि तारयित्वा दिवं नयेत्। स्वयम् मम प्रियो भूत्वा ब्रह्मलोकं गमिष्यति। यदि त्वय्युत्सृजेत् प्राणान् मम कर्मपरायणः। सोऽपि याति परं स्थानं यत्र गत्वा न शोचति। एवं दत्त्वा वरान् देव्यै तत्रैवान्तरधीयत। ततः प्रभृति तिष्ठामः चेतेऽस्मिन् शशलाञ्छन!"। "गण्डक्याश्चैकदेशे च शालग्रामस्थलं स्मृतम्। पाषाणं तद्भवं यत्तत् शालग्राममिति स्मृतम्" स्मृतिः। सा च शोणनदसन्निकृष्टस्थाने गङ्गायां सङ्गता हरिहरक्षेत्रतया च तत्सङ्गमस्थानं प्रसिद्धम्। "गण्डकीञ्च महाशोणं सदानीरां(करतोयाम्)तथैव च। एकपर्वतके सद्यः क्रमेणैवाव्रजन्त ते" भा०स०१९अ० "गण्डकीन्तु समासाद्य सर्वतीर्थजलोद्भवाम्। वाजपेयमवाप्नोति सूर्यलोकञ्च गच्छति" भा०व० ८४। "गण्डक्या उत्तरे तीरे गिरिराजस्य दक्षिणे। सिंहस्थं मकरस्थञ्च गुरुं यत्नेन वर्ज्जयेत्" मलमा० त०।

**गण्डकारी** स्त्री गण्डं ग्रन्थिं भग्नसंयोजनरूपं करोति कृ—अण् गौ० ङीष्। (हातजोड़ा) १वराहक्रान्तायामोषधौ रत्नमा०। २खदिरवृक्षे शब्दच०।

**गण्डकाली** स्त्री गण्डेषु ग्रन्थिषु काली। १खदिरीवृक्षे २समङ्गायाम् अमरः।

**गण्डकीपुत्र** पु० ६त०। १शालग्रामे शिलाभेदे। गण्डकी-शब्दे तस्य तत्पुत्रत्वकथा दृश्या।

**गण्डकीशिला** स्त्री गण्डक्यामुत्पन्ना शिला। शालग्रामशिलायाम्।

**गण्डकुसुम** न० गण्डस्य हस्तिकपोलस्य कुसुममिव। १हस्तिमदे हारा०।

**गण्डकूप** पु० गण्डे गण्डवदुच्चपर्वतस्थले कूपः। पर्वतोच्चदेशस्थे कूपे हारा०।

**गण्डगात्र** न० गण्ड इव उच्चावचं गात्रमस्य। (आता) फलप्रधाने वृक्षे शब्दचि०।

**गण्डदूर्व्वा** स्त्री गण्डयुक्ता ग्रन्थिमती दूर्वा। (गाँटदूर्वा) दूर्वाभेदे राजनि०। "गण्डदूर्वा हिमा लौहद्राविणी ग्राहिणी लघुः। तिक्ता कषाया मधुरा वातकृत् कटुपाकिनी। दाहतृष्णाबलासास्रकुष्ठपित्तज्वरापहा" भावप्र०।

**गण्डपाद** त्रि० गण्डस्य पाद इव पादोऽस्य हस्त्या० नान्त्यलोपः। गण्डतुल्यचरणे।

**गण्डफलक** न० गण्डः फलकमिव प्रशस्तत्वात् उपमितस०। १विस्तीर्णगण्डे। बहु०स०। २तद्युक्ते त्रि०। "धूतमुग्धगण्डफलकैर्विबभुर्विकसद्भिरास्यकमलैः प्रमदाः" माघः गण्डं भित्तिरिव। गण्डभित्त्यादयोऽपि तत्रार्थे "निधौतदानामलगण्डभित्तिः" "अनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय" रघुः।

**गण्डमाला** स्त्री ६त०। १रोगभेदे। तल्लक्षणभेदाद्युक्तं भावप्र० यथा

"कर्कन्धुकोलामलकप्रमाणैः कक्षांसमन्यागलवङ्क्षणेषु। मेदःकफाभ्यां चिरमन्दपाकैः स्याद्गण्डमाला बहुभिस्तु गण्डैः।" "गण्डमालाया एकावस्थाविशेषमपचीमाह "ते ग्रन्थयः केचिदवाप्तपाकाः